# सिद्धान्तलेशसङ्ग्रहानुसारेण विवरणानुसारिभिः श्रवणे नियमविधिप्रतिष्ठापनम्

**डॉ. पलाश-घोडइः** *

## Abstract

[भारतीयास्तिकदर्शनेषु अन्यतमं हि वेदान्तदर्शनम् । सिद्धान्तभेदाद् द्वैताद्वैतविशिष्टाद्वैतादयः बहवः वेदान्तसम्प्रदायाः दार्शनिकनिकाये प्रसिद्धाः । वेदान्तदर्शनेषु अद्वैतवेदान्तः विद्वत्सु प्रसिद्धतमः यस्य मुख्यः आचार्यो हि आचार्यशङ्करः । शङ्कराचार्यस्य प्रस्थानत्रयभाष्यमवलम्ब्य तत्परवर्तिकालिनः अद्वैतपण्डिताः विमताः आसन् येन परवर्तिनि काले अद्वैतवेदान्तेऽपि सम्प्रदायत्रयम् सृष्टम् । ते सम्प्रदायाः—भामतीसम्प्रदायः, विवरणसम्प्रदायः, वार्तिकसम्प्रदायश्च । एते सम्प्रदायाः यद्यपि अद्वैतमतानुसारिणः तथापि सम्प्रदायेष्वेतेषु प्रक्रियाभेदाः मतभेदाश्च भूयशः परिलक्ष्यन्ते । तथाहि—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदारण्यकोपनिषत् २.४.५] इति बृहदारण्यकश्रुतिषु 'श्रोतव्यः' इत्यत्र तव्यप्रत्ययश्रवणात् संशयो भवति यत् अत्र श्रवणविधिः किंविध इति । विधिस्तावत् त्रिधा—अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति । प्रकटार्थकाराणाम् अनुभूतिस्वरूपाचार्याणां मते अपूर्वविधिरयं श्रवणविधिः । परन्तु विवरणकाराणां प्रकाशात्मयतीनां मते नियमविधिरेवायम् । अतः अपूर्वविधित्वं खण्डयित्वा पञ्चभिः प्रकारैः श्रवणस्य नियमविधित्वं प्रकाशात्मयतिभिः साधितम् । अप्पय्यदीक्षितप्रणीते सिद्धान्तलेशसंग्रहग्रन्थे प्रथमे परिच्छेदे आदावेव श्रवणविधिविचारः प्रस्तुतः । स एव विषयोऽत्र प्रबन्धे यथाशास्त्रं प्रस्तूयते ।]

**कुञ्चिकाशब्दाः—** श्रवणम्, नियमविधिः, आत्मविचारः, विवरणम्, वेदान्तः ।

## उपोद्घातः

भारतीयास्तिकदर्शनेषु अन्यतमं हि वेदान्तदर्शनम् । सिद्धान्तभेदाद् द्वैताद्वैतविशिष्टाद्वैतादयो बहवो वेदान्तसम्प्रदाया दार्शनिकनिकाये प्रसिद्धाः । वेदान्तदर्शनेषु अद्वैतवेदान्तो विद्वत्सु प्रसिद्धतमो यस्य मुख्य आचार्यो हि शङ्करभगवत्पादः । शङ्कराचार्यस्य प्रस्थानत्रयभाष्यमवलम्ब्य तत्परवर्तिकालिनोऽद्वैतपण्डिता विमता आसन्, येन परवर्तिनि काले

* सहायकाध्यापकः, संस्कृतविभागे, राजा-नरेन्द्रलाल-खान्-महिला-महाविद्यालये, पश्चिममेदिनीपुरे, पश्चिमवङ्गेषु ; Email : palasghorai@gmail.com

अद्वैतवेदान्तेऽपि सम्प्रदायत्रयम् सृष्टम् । ते सम्प्रदायाः—भामतीसम्प्रदायः, विवरणसम्प्रदायः, वार्तिकसम्प्रदायश्च । एतेषु सम्प्रदायेषु विद्यमानानाम् समेषामेव आचार्याणां राद्धान्तो हि—अद्वैतात्मतत्त्वसाक्षात्कारादेव मोक्ष इति । परन्तु वेदान्तविचारवेलायाम् आत्मैक्यसिद्ध्यर्थं व्यवहारसिद्धविषयेषु जीवेश्वरजगद्रूपेषु अनादरात् तैः परस्परविरुद्धा नानाविधा सरणयः प्रदर्शिताः । अद्वैतवेदान्तवादिनां तान् सिद्धान्तभेदान् संकलय्य यथायुक्ति उपपादयता श्रीमदप्पय्यदीक्षितेन सिद्धान्तलेशसंग्रहाभिधेयो ग्रन्थो विरचितः । प्रक्रियाभेदे सत्यपि तेषामेकफलकत्वे सुरेश्वराचार्यवचनं प्रणिधानयोग्यम्—

यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥ इति ।

अप्पयदीक्षितप्रणीतस्य सिद्धान्तलेशसंग्रहग्रन्थस्य प्रथमे परिच्छेदे आदावेव श्रवणविधिविचारः प्रस्तुतः ।

## सन्दर्भः

शुक्लयजुर्वेदीयायां बृहदारण्यकोपनिषदि श्रूयते—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदारण्यकोपनिषत् २.४.५] इति । अत्र 'श्रोतव्यः' इत्यत्र तव्यप्रत्ययश्रवणात् संशयो भवति यत् श्रवणविधिः किंविध इति । विधिस्तावत् त्रिधा—अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति । अपूर्वविधिस्तावत् कालत्रयेऽपि कथमपि अप्राप्तस्य प्राप्तिफलको विधिः ।[१] यथा—"व्रीहिन् प्रोक्षति" इति । पक्षप्राप्तस्य अप्राप्तांशपरिपूरणफलको विधिः नियमविधिः ।[२] यथा—"व्रीहिन् अवहन्ति" इति । अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थोऽयं विधिः, किन्तु आक्षेपादेव अवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वसामान्यात् नखविदलनादिरपि पक्षे प्राप्नुयादिति अवहननाप्राप्तांशस्य सम्भवात् तदंशपरिपूरणफलको विधिः, तस्मात् नियमविधिरेवायम् । प्रकटार्थकाराणाम् अनुभूतिस्वरूपाचार्याणां मते अपूर्वविधिरयं श्रवणविधिः ।[३] परन्तु

[१] सिद्धान्तलेशसंग्रहे अपूर्वविधिः ।
[२] सिद्धान्तलेशसंग्रहे नियमविधिः ।
[३] सिद्धान्तलेशसंग्रहे अपूर्वविधिविचारः ।

विवरणकाराणां प्रकाशात्मयतीनां मते नियमविधिरेवायम् ।[४] अतः अपूर्वविधित्वं खण्डयित्वा पञ्चप्रकारैः श्रवणस्य नियमविधित्वं तैः साधितम् । तदेव इदानीं क्रमेण प्रस्तूयते ।

**अपूर्वविधित्वखण्डनम्**

"श्रोतव्यः" इत्यत्र श्रूयमाणो विधिर्न अपूर्वविधिः, प्राप्तत्वात् । तथाहि अप्राप्तप्रापको विधिरपूर्वविधिः । परन्तु विचारविशिष्टवेदान्तरूपस्य श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वं विधिं विनापि प्राप्तम् । ननु इन्द्रियजन्यज्ञानस्यैव साक्षात्कारत्वम्, कथं पुनः शब्दस्य साक्षात्कारहेतुत्वम् इति चेदुच्यते—न हि इन्द्रियजन्यत्वं ज्ञानस्य अपरोक्षत्वे तन्त्रम्, किन्तु अपरोक्षवस्तुविषयकत्वमेव । येन प्रमाणेन अपरोक्षज्ञानमुत्पद्यते तदेव प्रत्यक्षम् । शब्दो यद्यपि सामान्यतः परोक्षप्रमाणत्वेन स्वीक्रियते, तथापि तत्त्वमस्यादिवाक्यश्रवणात् जीवब्रह्मणोरैक्यप्रतिपत्तिरूपः अपरोक्षब्रह्मसाक्षात्कारो भवति, एतदेव शाब्दापरोक्षवादे व्यवस्थाप्यते ।[५] तस्माच्छब्दस्यापि अपरोक्षज्ञानजनकत्वात् श्रवणस्य अपरोक्षसाक्षात्कारहेतुत्वं प्राप्तम् एव ।

ननु अपरोक्षवस्तुविषयकं प्रमाणं स्वविषये साक्षात्कारहेतुरिति शाब्दापरोक्षवादे साधितम्, तेन वेदान्तानामपि स्वविषये नित्यापरोक्षे ब्रह्मणि अपरोक्षज्ञानसामान्यहेतुत्वमेव प्राप्तम्, न तु सत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वम् । तच्च विचारविशिष्टवेदान्तज्ञानरूप-श्रवणस्यैव युक्तम् । वाक्यजन्यसाक्षात्कारमात्रादेव अविद्यानिवृत्तिर्न भवति, तथा सत्तानिश्चयरूपसाक्षात्कारो न भवति । तथा सति वेदान्तश्रवणेनैव समेषां तत्त्वसाक्षात्कारः स्यात् । तादृशं न कदाचिदपि भवति । अतः श्रवणस्य अविद्यानिवृत्त्यर्थम् इष्यमाणसत्तानिश्चयरूपसाक्षात्कारहेतुत्वं न प्राप्तम् इति चेत्, न ।

---

[४] सिद्धान्तलेशसंग्रहे नियमविधिविचारः ।

[५] शाब्दापरोक्षवादः अद्वैतवेदान्तग्रन्थेषु बहुत्र प्रतिपादितः । तथाहि धर्मराजाध्वरीन्द्रविरचिते वेदान्तपरिभाषाग्रन्थे प्रत्यक्षपरिच्छेदे उच्यते—"न हि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रम्, दूषितत्वात्, किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वम् इत्युक्तम् । तथा च 'सोऽयं देवदत्तः' इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्यवृत्त्यवच्छिन्नचैत्यन्ययोरभेदेन 'सोऽयं देवदत्तः' इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्" इति ।

अपरोक्षवस्तुविषयकं प्रमाणम् अपरोक्षज्ञानहेतुरिति स्थिते, विचारे विचार्यनिर्णयहेतुरिति च स्थिते कार्यकारणभावद्वयमेलनेन प्रकृते विचारविशिष्टवेदान्तज्ञानरूपश्रवणं सत्तानिश्चयरूप-ब्रह्मसाक्षात्कारहेतुरिति सिद्ध्यति। तथाहि उच्यते सिद्धान्तलेशसंग्रहे—'विचारमात्रस्य विचार्यनिर्णयहेतुत्वस्य ब्रह्मप्रमाणस्य तत्साक्षात्कारहेतुत्वस्य च प्राप्तौ विचारितवेदान्तशब्दज्ञानरूपस्य श्रवणस्य तद्धेतुत्वप्राप्तेः'[६] इति।

ननु वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरित्यत्र अन्वयव्यतिरेकप्रमाणं नास्ति। तथाहि—लोके कृतश्रवणस्यापि बहुशस्तदनुपपत्तिः इत्यन्वयव्यभिचारः। अकृतश्रवणस्यापि गर्भगतस्य वामदेवस्य तदुत्पत्तिरिति व्यतिरेकव्यभिचारः।

सहकारिवैकल्ये सति अन्वयव्यभिचारस्य दोषो नास्ति। यथा—घटोत्पत्तिं प्रति सहकारिकारणं दण्डादि, तदभावे घटो नोत्पद्यते इति घटोत्पत्तिं प्रति मृदः कारणता नास्तीति वक्तुं न शक्यते। एवमेव एकाग्रताचित्तशुद्ध्यादिसहकारिकारणाभावात् कृतश्रवणस्यापि तत्त्वसाक्षात्कारो न जायते इति न दोषावहः।

किञ्च, जातिस्मरस्य जन्मान्तरश्रवणात् फलसम्भवेन व्यतिरेकव्यभिचारोऽपि नास्ति। तथाहि—जातमात्रे जन्तौ दृश्यमानभोगस्य कारणतया पूर्वजन्मसु क्रियमाणं कर्म यथा कल्प्यते, तथैव वामदेवस्यापि जन्मान्तरेषु वेदान्तश्रवणाद् गर्भगतस्यापि तस्य तत्त्वसाक्षात्कारोऽभवदिति युक्तियुक्तमेव। अन्यथा केवलं व्यभिचारेणैव श्रवणस्य तत्त्वसाक्षात्कारं प्रति कारणत्वे बाधिते सति श्रुत्या कथमपि श्रवणस्य साक्षात्कारकारणत्वं साधयितुं न शक्यते। तेन अपूर्वविधेरपि अप्रामाण्यमिति भावः।

न च एकस्य पदार्थस्य ज्ञाने परस्परनिरपेक्षकारणद्वयासम्भवेन ब्रह्मसाक्षात्कारे कारणान्तरशङ्कैव न जायते इति वाच्यम्, लोके तथा दृष्टत्वात्। तथाहि घटसाक्षात्कारे चक्षुर्यथा कारणं तथैव त्वगिन्द्रियमपि। एवमेव ब्रह्मसाक्षात्कारं प्रति यथा श्रवणं कारणं तथैवास्ति कारणान्तरमपि। अतो व्यतिरेकव्यभिचारोऽपि न दोषावहः। अतो विधिं विनापि श्रवणस्य ब्रह्मसाक्षात्कारकारणताप्राप्तौ श्रवणं न अपूर्वविधिः, अपि तु नियमविधिरेव।

ननु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"

[६] सिद्धान्तलेशसंग्रहे अपूर्वविधिखण्डनम्।

[बृहदारण्यकोपनिषत् २.४.५] इत्यादिना आत्मदर्शनोद्देशेन श्रवणादीनि विधीयन्ते। तत्र किमेतानि सकृदनुष्ठेयानि, किं वा यावदात्मदर्शनम् आवर्त्यानीति संशये सकृदेवानुष्ठेयानि, तावता विधेश्चरितार्थत्वात्। यथा—अग्निचयने "सर्वौधषस्य पूरयित्वा अवहन्ति" इति वाक्यविहितं सर्वौषधीनाम् अवहननमुपधेयोलूखलसंस्काररूपं सकृदेवानुष्ठीयते तद्वत्, तथा च सकृदनुष्ठितश्रवणादिजन्यमदृष्टं जन्मान्तरे ब्रह्मदर्शनहेतुरिति अपूर्वविधित्वं श्रवणविधीनाम् इति चेत्, उच्यते ब्रह्मसूत्रे—"आवृत्तिरसकृदुपदेशात्" [ब्रह्मसूत्रम् ४.१.१] इति, श्रवणाद्यावृत्तिः करणीया इत्यर्थः। कुतः? असकृदुपदेशात्। तथा हि तैत्तिरीयोपनिषदि भृगुवल्ल्यां भृगुं प्रति पिता असकृद् "तपसा ब्रह्म विजिज्ञासस्व" [तैत्तिरीयोपनिषत् ३.२.१] इत्युपदिशति। तपः आलोचनं ब्रह्मविचारः। छान्दोग्योपनिषदि अपि श्वेतकेतुं पुत्रं प्रति पिता विचारपूर्वकमसकृद् "तत्त्वमसि" [छान्दोग्योपनिषद् ६.८.७] इत्युपदिशति। श्रवणस्य नियमविधित्वे सत्येव ब्रह्मसूत्रस्थम् आवृत्त्यधिकरणं सङ्गच्छते। तथाहि आवृत्त्यधिकरणभाष्ये—दर्शनपर्यवसानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति, यथा अवघातानि तण्डुलनिष्पत्तिपर्यवसानानि इत्युक्तम्। यथा तण्डुलनिष्पत्तेः दृष्टफलत्वात् यावत् तण्डुलनिष्पत्तिं तावदवहननं कर्तव्यं तद्वत् श्रवणस्यापि दृष्टफलत्वात् ब्रह्मतत्त्वसाक्षात्कारपर्यन्तं श्रवणं कर्तव्यम्। श्रवणादिभिः आत्मदर्शनफले जननीये श्रवणाद्यावृत्तिरूपदृष्टद्वारसम्भवे अदृष्टद्वारकल्पनायोगात्तत्त्वंपदार्थयोः श्रवणाद्यावृत्तिं विना दुर्बोध्यत्वाच्च तण्डुलनिष्पत्तिफलकावघातवद् आवृत्तिरेव, न त्वग्निचयनान्तर्गतावघातवद् नावृत्तिः।

**नियमविधौ प्रकाराः**

**१. प्रथमः प्रकारः**— अतो नियमविधिरेवायम्। यथा कश्चन जनः चक्षुषा सामान्यतया किञ्चित् वस्तु वीक्ष्यापि तस्य सूक्ष्मं विशेषं न गृह्णाति, किन्तु केनचित् कथिते तत्सूक्ष्मविशेषावगमाय पुनः सप्रणिधानं वीक्ष्यते तद्वत् मनसा "अहम्" इति गृह्यमाणो जीवः "स्वाध्यायोऽध्येतव्यः" इति विधिप्राप्ताद् वेदान्ताध्ययनाज्जीवस्य निर्विशेषब्रह्मरूपत्वम् आकर्ण्य ब्रह्मस्वरूपावगमाय पुनः अहमिति गृह्यमाणे आत्मनि सावधानं मनस एव प्रणिधाने कदाचित् प्रवर्तेत इति वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यात्। ननु अहमिति गृह्यमाणे जीवे विशेषाकर्णनानन्तरं वेदान्तश्रवणे

इव कदाचित् मनोव्यापारे वेदान्तविचारनिरपेक्षेऽपि प्रवृत्तिः स्यादित्युक्तम् । परन्तु "अप्राप्य मनसा सह" [तैत्तिरीयोपनिषत् २.४.१] इति श्रुत्या ब्रह्मणि मनोविषयत्वनिषेधात् साङ्गाध्ययनवतः तन्निषेधावगतिसम्भवाद् न प्रवृत्तिरिति चेन्न । "अप्राप्य मनसा सह" [तैत्तिरीयोपनिषत्- २.४.१] इत्यस्य अनवहितमनसा ब्रह्म न प्राप्यम् इत्यर्थः । किञ्च, "मनसैवानुद्रष्टव्यम्" [बृहदारण्यकोपनिषत् ४.४.१९] "दृश्यते त्वग्रया बुद्ध्या" [कठोपनिषत् १.३.१२] इत्यादिश्रुतौ मनसैव साक्षात्कारत्वोक्तेः आत्मतत्त्वसाक्षात्कारे आत्मविषयकमनोव्यापाररूप-पक्षप्राप्तौ वेदान्तश्रवणस्य पाक्षिकी अप्राप्तिः स्यात् । तदंशपरिपूरणफलकोऽयं नियमविधिः ।

**२. द्वितीयः प्रकारः—** अधीतसाङ्गवेदस्य हि "तरति शोकमात्मवित्" [छान्दोग्योपनिषत् ७.१.३] इत्यादिश्रुत्या आत्मज्ञानं मुक्तिसाधनम् इति ज्ञानं भवति । परन्तु तस्यापि विचारमन्तरेण आत्मज्ञानं न सम्भवति । आत्मतत्त्वप्रेप्सुः ज्ञानार्थी अज्ञानभ्रमसंशयादिनिरासाय वेदान्तविचारे प्रवर्तमानो यथा ब्रह्ममीमांसाशास्त्रे प्रवर्तते, तथैव न्यायसांख्यादिशास्त्रविचारेऽपि कदाचित् प्रवर्तेत । सांख्यादितर्कशास्त्रेषु अद्वितीयात्मतत्त्वविचाराभावाद् भ्रमसंशयादिनिवृत्तिर्न भवति, तस्मात् तत्र आत्मज्ञानार्थिनां प्रवृत्तिः न सम्भवतीति न वाच्यम् । जीवभिन्नपरमात्मज्ञानं मुक्तिसाधनमिति भ्रमेण तत्रापि प्रवृत्तिसम्भवात् । ननु "अहं ब्रह्मास्मि" [बृदहारण्यकोपनिषत् १.४.१०], "ब्रह्मविदाप्नोति परम्" [तैत्तिरीयोपनिषत् २.१.१] इत्यादिवेदान्तवाक्येषु जीवाभिन्नपरमात्मज्ञानस्य एव मुक्तिसाधनत्वप्रसिद्धेः कुतः भिन्नात्मज्ञानं मुक्तिसाधनमिति भ्रमः सम्भवेदिति चेत्, "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" [मुण्डकोपनिषत् ३.१.२] इति श्रुतिगतान्यशब्देन जीवभिन्नपरमात्मज्ञानान्मुक्तिर्भवतीति भ्रमः सम्भवेदेव । अतः मुक्तिसाधनाय भिन्नात्मविचाररूपे शास्त्रान्तरश्रवणे पक्षे प्रवृत्तिः स्यात् । तदा वेदान्तश्रवणम् अप्राप्तम् । एवं पक्षप्राप्तस्य न्यायादिशास्त्रान्तरश्रवणस्य अप्राप्तांशपरिपूरणफलको वेदान्तविचारपरिपूरणफलकः "श्रोतव्य" इति विधिः नियमविधिरिति सङ्गच्छते ।

ननु श्रवणविधौ आत्मविचारमात्रं प्रतीयते न तु अद्वैतात्मविचारः, अतो भिन्नात्मविचारात् निवृत्तिः कथं विधिना बोध्यते इति चेदुच्यते—"इदं सर्वं

यदयमात्मा" [बृहदारण्यकोपनिषत् २.४.६] इत्यादिप्रकरणपर्यालोचनेन अद्वितीयात्मप्रतीतिनिश्चयो भिन्नात्मविचारव्यावृत्तिश्च लभ्यते ।

ननु तण्डुलनिष्पत्तौ अवहननस्येव नखविदलनादेरपि वस्तुतः साधनत्वात् तन्निवृत्तिफलको नियमविधिर्युज्यते, प्रकृते तु अद्वितीयब्रह्मसाक्षात्कारे भिन्नात्मविचारस्य वस्तुतः साधनत्वं नास्त्येव, अतः तन्निवृत्तिफलको नियमविधिर्न युज्यते एव इति चेदुच्यते—"न हि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिरिति कुलधर्मः"[७] इति । यदि साधनान्तरप्राप्तौ एव नियमविधिरङ्गीक्रियते तर्हि वेदान्तश्रवणरूपनियमविधिः अदृष्टमुत्पाद्य ब्रह्मसाक्षात्कारप्रतिबन्धककल्मषनिवृत्तिसम्पादनेन सत्तानिश्चयरूपब्रह्म-साक्षात्कारस्य कारणं भवतीति कारणात् ब्रह्मसाक्षात्कारे साधनान्तर-सम्भवात् श्रवणस्य नियमविधित्वं नास्तीति शङ्का युज्यते । किन्तु प्रकृते तत्रैव नियमविधिः स्वीक्रियते यत्र सम्भाव्यमानस्य साधनान्तरतया पक्षे प्राप्तिवशात् वेदविहितसाधनस्य पक्षे अप्राप्तिः निवारयितुं न शक्यते । एवं प्रकृते भिन्नात्मविचारस्य मोक्षसाधनत्वेन सम्भाव्यमानतया पक्षे प्राप्तिवशाद् अद्वितीयात्मतत्त्वविचाररूपश्रवयस्य पक्षे अप्राप्तिः भवत्येव । तस्मात् नियमविधिरयम् ।

**३. तृतीयः प्रकारः—** श्रवणमित्यनेन गुरुमुखाद् वेदान्तश्रवणमिति स्वीक्रियते । गुरुमुखाधीनाध्ययनाद् यथा सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानं भवति, तथैव निपुणस्य स्वप्रयत्नमात्रसाध्यादपि वेदान्तविचारात् सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानम् भवति । गुरुमुखाधीनवेदान्तवाक्य-श्रवणजन्यं नियमादृष्टं कल्मषनिरासेन अविद्यानिवृत्तिं प्रति उपयुज्यते । किन्तु गुरुमुखाद् वेदान्तश्रवणं यदि न भवति तर्हि नियमादृष्टाभावेन कल्मषनिवृत्त्यभावात् तच्छ्रवणम् अविद्याम् अनिवर्तयत् परोक्षज्ञानतुल्यं भवति । तेन सत्तानिश्चयरूपब्रह्मसाक्षात्कारो न भवति ।

ज्ञानोदये सति अज्ञाननिवृत्तिर्न भवतीति अयुक्तम्, यथा शुक्तिप्रमायां सत्यां रजतरूपाज्ञाननिवृत्तिः न भवतीत्ययुक्तमिति चेन्न, ज्ञानोदये सति अज्ञाननिवृत्तिरिति नियमो नास्ति, कारणं हि—सर्वत्र कार्यं प्रति प्रतिबन्धकाभावापेक्षायां सत्यां प्रत्यक्षेण विशेषदर्शनेऽपि उपाधिना

[७] सिद्धान्तलेशसंग्रहे नियमविधिः ।

प्रतिबन्धात् प्रतिविम्बभ्रमो न निवर्तते । एवमेव ब्रह्मविषयकापरोक्षज्ञानं कल्मषेण प्रतिबद्धं सत् अविद्यां न निवर्तयति ।

गुरुमुखाद् वेदाध्ययनं कर्तव्यमिति विधिरस्ति । परन्तु लिखितपुस्तकादपि स्वाध्यायः सम्भवति । तेन च स्वयमेव ग्रन्थाद् वेदाध्ययनं कर्तुं शक्यते । एवं स्वाध्यायविधौ लिखितपाठात् स्वाध्यायसम्भावनाप्रसक्तौ गुरुमुखाध्ययनस्य नियमविधित्वं स्वीक्रियते । एवमेव लिखितपुस्तकपठनेन स्वप्रयत्नमात्रसाध्यस्य वेदान्तविचार-रूपश्रवणस्यापि सत्तानिश्चयरूपब्रह्मसाक्षात्कारार्थत्वेन पक्षे प्राप्तौ अप्राप्तांशस्य गुरुमुखाधीनश्रवणस्य नियमविधित्वं स्वीक्रियते ।

ननु "तद्विज्ञानार्थं स गुरुमेवाधिगच्छेत्" [मुण्डकोपनिषत् १.२.१२] इति गुरूपसदनविधिनैव गुरुरहितविचारस्य व्यावृत्तिसिद्धेः गुरूपसदनविधेः नियमविधित्वं सङ्गच्छते, कुतः पुनः गुरुमुखश्रवणस्य नियमविधित्वम् इति चेन्न, गुरूपसदनविधिर्हि श्रवणविधेरङ्गभूतः । अङ्गिरूपश्रवणविध्यभावे तस्यापि वैफल्यमेव । यदि अङ्गविधिना अङ्गिविधेः असिद्धिः स्यात्तर्हि पूर्वपक्षिमते अध्ययनविधेरपि नियमविधित्वं न सङ्गच्छते । इदानीं गुरूपसदनविधिना एव लिखितपाठादिवारणसम्भवात् गुरूपसदनस्यैव नियमविधित्वं सङ्गच्छते न तु अध्ययनविधेः । तथाहि— "स्वाध्यायोऽध्येतव्यः" इति नियमविधिः । लिखितपाठादिवारणाय अध्ययने नियमविधिः स्वीक्रियते । गुरूपसदनविधिर्हि अध्ययनविधेः अङ्गभूतः । पूर्वपक्षिमते अङ्गविधिना अङ्गविधेः वैफल्याद् अङ्गभूतगुरूपसदनविधिना एव अङ्गिभूताध्ययनविधेः वैफल्यं सिध्यति । तेन गुरूपसदनविधिना लिखितपाठादिवारणसम्भवाद् गुरूपसदनस्यैव नियमविधित्वं संगच्छते, न तु अध्ययनविधेः ।

**४. चतुर्थः प्रकारः—** श्रवणस्य नियमविधित्वसिद्ध्यर्थं प्रकारान्तरम् उच्यते—"अथवा अद्वैतात्मपरभाषाप्रबन्धश्रवणस्य पक्षे प्राप्त्या वेदान्तश्रवणे नियमविधिरस्तु"[८] इति । अद्वैतं जिज्ञासमानेन यथा वेदान्ता विचारणीयास्तथैव अद्वैतप्रतिपादकभाषाप्रबन्धा इति परभाषाप्रबन्धानां पक्षे प्राप्तिवशाद् वेदान्तविचारोऽप्राप्तः । अतस्तत्प्राप्त्यर्थोऽयं श्रवणविधिरस्तु ।

[८] सिद्धान्तलेशसंग्रहे नियमविधिः ।

ननु "न म्लेच्छितवै" इति निषेधादेव भाषाप्रबन्धरूपाव्यक्तशब्दस्योच्चारणं पुरुषेण न कर्तव्यम्, अन्यथा पुरुषः प्रत्यवायी भवेदिति श्रवणाधिकारिणो भाषाप्रबन्धव्यावृत्तिसिद्धेः श्रवणे नियमविधिस्वीकारो निष्प्रयोजन इति चेन्न। शास्त्रव्युत्पत्तिमान्द्याद् वेदान्तश्रवणम् अशक्यमिति विचिन्त्य पुरुषार्थनिषेधमुल्लङ्घ्यापि भाषाप्रबन्धेन अद्वैतं जिज्ञासमानस्य भाषा प्रबन्धादिषु प्रवृत्तिसम्भवेन श्रवणस्य पाक्षिकी अप्राप्तिः स्यात्, अतः तत्प्राप्तिपरिपूरणफलकोऽयं नियमविधिः।

पुरुषार्थनिषेधमुल्लङ्घ्यापि महाफलसिद्ध्यर्थं निषिद्धे प्रवृत्तिर्भवति, अतः तन्निवृत्तिफलको नियमविधिः मीमांसकैरपि स्वीक्रियते एव। यद्यपि 'नानृतं वदेत्' इति निषेधः सामान्यतः सर्वपुरुषार्थपरत्वेन विधीयमानो दृश्यते तथापि अविकलां क्रतुसिद्धिं कामयमानोऽपि कदाचिद् दर्शपूर्णमासयागकाले कुतश्चित् कारणवशात् निषेधमुल्लङ्घ्य अनृतं कथयेदिति दर्शपूर्णमासप्रकरणे पुनः क्रत्वर्थपरतया 'नानृतं वदेत्' इति निषेधो विहितः। क्रत्वर्थपरतया निषेधस्य अर्थवत्त्वं पूर्वमीमांसायां कर्त्रधिकरणे प्रतिपादितम्।

**५. पञ्चमः प्रकारः—** यथा मन्त्रमूलककल्पसूत्रात्मीयग्रहणवाक्यादीनां मन्त्रार्थस्मरणाय पक्षे प्राप्तिवशात् "मन्त्रैरेव मन्त्रार्थस्मृतिः साध्या" इति नियमविधिः, तथैव वेदान्तमूलकमहाभारतपुराण-पौरुषेयप्रबन्धादीनां श्रवणस्यापि पक्षे प्राप्तिवशात् तन्निवृत्तिफलकः "श्रोतव्यः" इति नियमविधिः।

एवं सर्वप्रकारेणैव श्रोतव्य इति नियमविधिः। नियमविधौ पाक्षिकाप्राप्तिवशात् तदभिप्रायेणैव "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्" [ब्रह्मसूत्रम् ३.४.४७] इत्यधिकरणभाष्ये अपूर्वविधित्वोक्तिः। तत्रैव भाष्यस्थले पक्षेणेति पदं पाक्षिकाप्राप्तिबोधनाय एव योजितमिति स्पष्टीकृतम्।

**उपसंहारः**

एवं त्रिषु विधिषु 'श्रोतव्यः' इति नियमविधिः इति विवरणानुसारिणां प्रकाशात्मयतीनां सिद्धान्तः। पञ्चभिः प्रकारैः श्रवणस्य नियमविधित्वं तैः साधितम्। सर्वत्रैव तु पक्षान्तरस्य प्राप्तिसम्भावनावशाद् वेदान्तश्रवणस्य वेदान्तविचारस्य वा पाक्षिकी अप्राप्तिः। अतस्तत्प्राप्तांशप्राप्तिफलकोऽयं विधिरिति श्रवणस्य नियमविधित्वं

युक्तमेव । विवरणानुसारिणां मतमतिरिच्यापि अप्पय्यदीक्षितेन स्वकीयग्रन्थे श्रवणस्य नियमविधिसमर्थकानि केषाञ्चिद् अद्वैतविदुषां विशेषतः संक्षेपशारीरककाराणां सर्वज्ञात्ममुनीनां मतानि सयुक्तिकं समुपस्थापितानि । ततश्च श्रोतव्यवाक्ये विधिरेव नास्तीति वाचस्पतिमिश्रपादानां मतमपि यथाविस्तरं प्रदर्शितम् । प्रबन्धेऽस्मिन् विवरणानुसारिणां मतानि केवलं सविस्तरं प्रतिपादितानि, अन्यानि मतानि नालोचितानि इति शिवम् ।

✶ ✶ ✶

## Bibliography


1. *सिद्धान्तलेशसंग्रहः ;* अप्पयदीक्षितः ; ललिता-सेनगुप्तः (अनुवादकः) ; संस्कृत पुस्तक भाण्डार ; कोलकाता ; २००६ ।
2. *वेदान्तपरिभाषा;* धर्मराजाध्वरीन्द्रः ; शरच्चन्द्र-घोषालः (अनुवादकः) ; करुणासिन्धु दास (सम्पादकः) ; संस्कृत पुस्तक भाण्डार ; कोलकाता ; २००४ ।
3. *ब्रह्मसूत्रशाङ्करभाष्यम् ;* अनन्तकृष्णशास्त्री, वासुदेवशर्मा (सम्पादकौ) ; राष्ट्रियसंस्कृतसंस्थानम् ; २०१२ ।
4. *श्रीशङ्करभगवत्पादाचार्यविरचितम् उपनिषद्भाष्यम्* (खण्डः १) ; एस्. सुब्रह्मण्यशास्त्री (सम्पादकः) ; दक्षिणामूर्ति-मठ-प्रकाशन ; २०११ ।
5. *मन्त्रपुष्पम् ;* स्वामी देवरूपानन्दः (सम्पादकः) ; रामकृष्ण मठ ; मुम्बई ; २००७ ।


✳ ✳ ✳